विश्वानर एव। स्वार्थे अण्। यद्वा, “विश्वान् नरान् इतो लोकात् लोकान्तरं नयति। इदमर्थेन विश्वानराख्यां नेतृत्वेन सम्पद्यन्ते वा कर्म्मार्थेप्रणेतृत्वेन सम्पादिनोऽस्य वैश्वानरः। ‘अन्येषामपि दृश्यते।’ ६।३।१३७। इति दीर्घः। अपि वा विश्वान् अन्तून् अरः। ऋ गतौ इत्यस्य छान्दसत्वात् पदाद्यच् उपपदविभक्त्यलुक्। सर्व्वाणि भूतानि अरः प्रकृतः प्रतिगतः प्रविशति विश्वानरः प्राणः। तेन अन्यमानत्वात् तस्यापत्यं वैश्वानरः।” इति निघण्टुटीकायां देवराजयज्वा।५।१।) अग्निः। (यथा, गीतायाम्। १५। १४।

“अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्व्विधम्।”)

चित्रकवृक्षः। इत्यमरः। अस्योत्पत्तिकारणं यथा,—

“तथापि दग्धि यो रूपे दे हे प्रत्येकशोऽधुना।
भूतकार्य्यैश्वभूतेन देवलोके तु मर्त्तिना।
तिष्ठध्वमपि कालान्ते लयं त्वाविशतु द्रुतम्।
शरीराणि पुनर्न्नैव कर्त्तव्योऽहमिति क्वचित्।
गर्त्तेनाम्च तथा सुभ्यं दग्धि नामानि योऽधुना।
अग्निर्व्वैश्वानरो नाम प्राणापानौ तथाश्विनौ।
भविष्यति तथा गौरी हिमशैलसुता तथा।
एषिषादिगणस्तेष गणवक्त्रो भविष्यति।
शरीरधातवस्तेते नानाभूतानि एव तु।
अहङ्कारस्तथा स्कन्दः कार्त्तिकेयो भविष्यति।”

इति वाराहे आदित्रेतायां महातपोपाख्याननामाध्यायः।

वैश्वी, स्त्री, उत्तराषाढ़ानक्षत्रम्। इति हेमचन्द्रः।

वैषम्यं, क्ली, (विषम+भावे ष्यञ्।) विषमत्वम्। विषमशब्दात् भावे ष्यञ्प्रत्ययेन निष्पन्नम्। (नतोन्नतत्वम्। यथा, महाभारते। १२। ५६। ११४।

“समतां वसुधायाश्च स सम्यगुदपादयत्।
वैषम्यं हि परं भूमेरासीदिति च नः श्रुतम्।”

तारतम्यम्। यथा, महाभारते।१।२०८।२१।

“महच्च फलवैषम्यं दृश्यते कर्म्मसन्धिषु।”

दुःखम्। यथा, तत्रैव। ३। ६१। २०।

“वैषम्यं परमं प्राप्तो दुःखितो गतचेतनः।
भर्त्ता तेऽहं निबोधेदं वचनं हितमात्मनः।”)

वैषयिकः, त्रि, विषयसम्बन्धी। विषयशब्दात् ष्णिक-प्रत्ययेन निष्पन्नः। (यथा, साहित्यदर्पणे। ३। २४०।

“यत्नास्मिन् सुखाभावोऽप्युक्तस्तस्य वैषयिकसुखपरत्वान्न विरोधः।”)

वैहुतं, क्ली, होमभस्म। इति हेमचन्द्रः।

वैष्टं, क्ली, (विश+“अशूप्रिणशिमिचमिविशशाभ्यां तुन्निश।” उणा० ४। १५६। इति तुन् तुन्निश।) पिष्टपम्। इत्युणादिकोषः। द्यौः। वायुः। विष्णुः। इति संक्षिप्तसारोणादिवृत्तिः।

वैष्णं, क्ली, (विष्णोरिदम्। विष्णु+अण्।) होमभस्म। इति शब्दरत्नावली। (महापुराणविशेषः। यथा, देवीभागवते। ३। १। ८।

“त्रयोविंशतिसाहस्रं वैष्णवं परमाद्भुतम्।”)

विष्णुसम्बन्धिनि, त्रि। (यथा, रघुः।११।८५।

“मां गतस्य तव धाम वैष्णवं
कोपितो ह्यसि मया दिदृक्षुणा।”)

वैष्णवः, पुं, (विष्णुर्द्देवता अस्य। अण्।) विष्णुमन्त्रोपासकः। विष्णुभक्तः। तत्पर्य्यायः। कार्ष्णः २ हारः ३। तस्य लक्षणं यथा,—

“गृहीतविष्णुदीक्षाको विष्णुसेवापरो नरः।
वैष्णवश्चात्र संग्राह्यः स्कान्दाद्युक्तानुसारतः।”

तथा च स्कान्दे।

“परमापदमापन्नो हर्षे वा समुपस्थिते।
नैकादशीं त्यजेद्यस्तु यस्य दीक्षास्ति वैष्णवी।
समात्मा सर्व्वजीवेषु निजाचारादविप्लुतः।
विष्ण्वर्पिताखिलाचारः स हि वैष्णव उच्यते।”

इति श्रीहरिभक्तिविलासे ११ विलासः। *। अथ श्रीवैष्णवनिन्दादिदोषः। स्कान्दे मार्कण्डेयभगीरथसंवादे।

“यो हि भागवतं लोकमुपहासं नृपोत्तम।
करोति तस्य नश्यन्ति अर्थधर्म्मयशःसुताः।”*

अथ वैष्णवसमागमविधिः। तेजोद्रविणपञ्चरात्रे।

“वैष्णवो वैष्णवं दृष्ट्वा दण्डवत् प्रणमेद्भुवि।
उभयोरन्तरा विष्णुः शङ्खचक्रगदाधरः।”*।

अथ वैष्णवसम्मानननित्यता। स्कान्दे श्रीमार्कण्डेयभगीरथसंवादे।

“दृष्ट्वा भागवतं दूरात् संमुखे यो न याति हि।
न गृह्णाति हरिस्तस्य पूजां द्वादशवार्षिकीम्।”

अथ वैष्णवस्तुतिः। स्कान्दे।

“धन्योऽहं कृतकृत्योऽहं यद्यूयं गृहमागताः।
दुर्लभं दर्शनं नूनं वैष्णवानां यथा हरेः।”*।

अथ वैष्णवाभिगमनमाहात्म्यम्। स्कान्दे श्रीमार्कण्डेयभगीरथसंवादे।

“संमुखं व्रजमानस्य वैष्णवानां नराधिप।
पदे पदे यज्ञफलं प्राहुः पौराणिका द्विजाः।”

अथ वैष्णवस्तुतिमाहात्म्यम्। तत्रैव।

“प्रत्यक्षं वा परोक्षं वा यः प्रशंसति वैष्णवम्।
ब्रह्महा मद्यपः स्तेयी गुरुगामी सदा नृणाम्।
मुच्यते पातकात् सद्यो विष्णुराह नृपोत्तम।”*

अथ वैष्णवसम्माननमाहात्म्यम्। शेषवाक्यतसारोद्धारे।

“महता दत्तमनेन वैष्णवानिह्य जीर्य्यति।
तदन्नं मेरुणा तुल्यं भवते च दिने दिने।”*।

अथ वैष्णवशास्त्रमाहात्म्यम्। स्कान्दे श्रीब्रह्मनारदसंवादे।

“वैष्णवानि च शास्त्राणि ये शृण्वन्ति पठन्ति च।
धन्यास्ते मानवा लोके तेषां कृष्णः प्रसीदति।”

इति च श्रीहरिभक्तिविलासे १० विलासः।

तस्य लक्षणमाहात्म्यादि यथा,—

“फलसन्धानरहिता विष्णुभक्ताश्च वैष्णवाः।
मत्प्रीतिभक्तिकामास्ते सर्व्वदा सर्व्वकर्म्मसु।
गुरुवक्त्राद्विष्णुमन्त्रो यस्य कर्णे प्रवेक्ष्यति।
जीवन्मुक्तं वैष्णवन्तं वेदाः सर्व्वे वदन्ति च।
पुरुषाणां शतं पूर्ब्बं पैतृकञ्च शतं परम्।
मातामहस्य च शतं मातरं मातृमातरम्।
भगिनीं भ्रातरञ्चैव भागिनेयञ्च मातुलम्।
श्वश्रूञ्च श्वशुरञ्चैव गुरुपत्नीं गुरोः सुतम्।
गुरुञ्च ज्ञानदातारं मित्रञ्च सहचारिणम्।
भृत्यं शिष्यं तथा चेटीं प्रजाः स्वाश्रमसन्निधौ।
उद्धरेदात्मना सार्द्धं मन्त्रग्रहणमात्रतः।
मन्त्रग्रहणमात्रेण जीवन्मुक्तो भवेन्नरः।
तस्य संस्पर्शमात्रेण पूतं तीर्थञ्च भारतम्।
तस्यैव पादरजसा सद्यः पूता वसुन्धरा।
पादोदकम्नुतं स्थानं तीर्थमेव भवेद् ध्रुवम्।”

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ८ अध्यायः। *।

अपि च।

श्रीशिव उवाच।

“शिवमस्तु च साधूनां वैष्णवानां सतामिह।
अवैष्णवानामसतामशिवञ्च पदे पदे।
ददाति वैष्णवेभ्यश्च यो दुःखं मूर्च्छितो जनः।
श्रीकृष्णस्य च संहर्त्ता विघ्नस्तस्य पदे पदे।
अवैष्णवानां हृदयं न हि शुद्धं सदा मलम्।
श्रीकृष्णमन्त्रस्मरणं मनोनैर्म्मल्यकारणम्।
भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्व्वसंशयाः।
विष्णुमन्त्रोपासनया क्षीयते कर्म्म वै नृणाम्।
ये ब्राह्मणा वैष्णवाश्च स्वतन्त्राः परमं पदम्।
यान्त्यन्योपासकाश्चान्ये साद्धेञ्च प्रकृतेर्लये।
वर्णानां ब्राह्मणाः श्रेष्ठाः साधवो वैष्णवा यदि।
विष्णुमन्त्रविहीनेभ्यो द्विजेभ्यः श्वपचो वरः।
परिपक्वाश्चाविपक्वा वैष्णवाः साधवश्च ते।
सन्ततं पतितांश्चैव विष्णुचक्रं सुदर्शनम्।
यथा वह्नौ शुष्कवृक्षं भस्मीभूतं भविष्यति।
तथा पापं वैष्णवेषु तेजस्विषु हुताशनात्।
गुरुवक्त्राद्विष्णुमन्त्रो यस्य कर्णे प्रवेक्ष्यति।
तं वैष्णवं महापूतं प्रवदन्ति मनीषिणः।
प्रशंसितं पितॄणाञ्च शतं मातामहस्य च
स्वसोदरांश्च जननीमुद्धरन्त्येव वैष्णवाः।
गयायां पिण्डदानेन पिण्डदाः पिण्डभोजिनम्।
समुद्धरन्ति पुंसाञ्च वैष्णवाश्च शतं शतम्।
मन्त्रग्रहणमात्रेण जीवन्मुक्तो भवेन्नरः।
यमस्तस्मान्महाभीतो वैनतेयादुयथोरगः।
विष्णुसत्त्वेव तीर्थानि गङ्गादीनि च भारते।
कृष्णमन्त्रोपासकाश्च स्पर्शमात्रेण वाक्पते।
पापानि पापिनां तीर्थे यावन्ति प्रभवन्ति च।
नश्यन्ति तानि सर्व्वाणि वैष्णवस्पर्शमात्रतः।
कृष्णमन्त्रोपासकानां रजसा पादपद्मयोः।
सद्यो मुक्ता पातकेभ्यो हृष्टा पूता वसुन्धरा।
वायुश्च वरुणो वह्निः सूर्य्यः सर्व्वं पुनाति च।
एते पूता वैष्णवानां स्पर्शमात्रेण लीलया।
अहं ब्रह्मा च शेषश्च साक्षी धर्म्मश्च कर्म्मणाम्।
एते हृष्टाश्च वाञ्छन्ति वैष्णवानां समागमम्।
फलं कर्म्मानुसारेण सर्व्वेषां भारते भवेत्।
न भवेत्तद्वैष्णवे च सिद्धधान्ये यथाङ्कुरम्।
हन्ति तेषां कर्म्म पूर्ब्बं भक्तानां भक्तवत्सलः।